# ब्राह्मी

## अद्वैतवेदान्तविभागीया शोधपत्रिका




प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकः

डा. गणेश ईश्वर भट्टः



राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७ १३९

# वेदान्तशास्त्रस्य पूर्वतन्त्रेण अगतार्थत्वम्

डा. जानकीशरणः आचार्यः, सहायकाचार्यः
सोमनाथसंस्कृतविश्वविद्यालयः, वेरावल्

## १.१ किञ्चित् प्रास्ताविकम्

सर्वमेव दर्शनं शास्त्रं वा चतुर्व्यूहमिति प्रसिद्धिरस्ति । यथा वैद्यशास्त्रं रोगः, तन्निदानं, तन्निवृत्त्युपायः, तन्निवृतौ स्वस्थता चेति चतुर्व्यूहे स्थितम् । तथैव सर्वमपि दर्शनं चतुर्व्यूहम् । सर्वमपि हितशासके दर्शने अवश्यम् इमे चत्वारः व्यूहाः भवन्ति- दुःखम्, तन्निदानम्, तन्निवृत्त्युपायः, तन्निवृतौ स्वस्थता इति । इयं स्वस्थता दर्शनेषु मोक्षः तत्त्वज्ञानम्, सम्यज्ज्ञानम्, तत्त्वसाक्षात्कारः, परमज्ञानम्, विज्ञानम्, विवेकख्यातिः इत्यादिभिः शब्दैः व्यपदिश्यते । तदर्थमेव सर्वे दार्शनिकाः यतमानाः दृश्यन्ते । जीवो स्वकृतज्ञाताज्ञातपुण्यापुण्यवशात् नवं नवं शरीरमापद्य प्रत्यहं संसाराह्वं घोरं कान्तारं निरन्तरं सञ्चरति । अस्य जीवस्य सर्वदुःखप्रहाणाय एव सर्वासाम् उपनिषदां प्रवृत्तिः । किन्तु उपनिषदः शाखाभेदेन एकमेव अर्थं नैकशब्देन नैकभेदेन च प्रतिपादयन्ति । अतः उपनिषदर्थः न अल्पधियां बुद्धिपथमारोहति । न्यायोपबृंहितं वाक्यं सुखेन स्वार्थं निश्चाययति । उक्तं हि "न्यायैः प्रसाधितो ह्यर्थ आरोहति मतिं द्रुतम्" इति । अतः न्यायत उपनिषदर्थं निर्णेतुं भगवान् सूत्रकारः वेदान्तविचारात्मिकां शारीरकमीमांसाम् अरीरचत् । भाष्यकारेण शङ्कराचार्येणापि तथैव अभाणि –"वेदान्तवाक्यानाम् कुसुमग्रथनार्थत्वात् सूत्राणाम् । वेदान्तवाक्यानि





सूत्रैरुदाहृत्य विचार्यन्ते[1]" इति । तेषां सूत्राणाम् उपरि भाष्यकाराः प्रसन्नगभीरं भाष्यं रचयामासुः।

## १.२ अद्वैतसिद्धान्तविकासः

यद्यपि "**नदीनां सागरो गतिः**[2]" इतिवत् समेषामास्तिक-दर्शनानामात्मतत्त्वबोधनाय प्रयासः तथापि न सर्वेषां दर्शनानां साक्षात्तदर्थप्रतिपादकत्वं किं तु परम्परया, इत्यतः साक्षाद् आत्मतत्त्वप्रतिपादनाद् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानं भजते। अस्मिन् खलु वेदान्तदर्शने प्रस्थानत्रयम् अतिप्रसिद्धम्— श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, न्यायप्रस्थानञ्चेति। प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः।[3] मुमुक्षोः किल संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तज्ज्ञानोपदेशको मार्गः वेदान्तः प्रस्थानपदेनाभिधीयते। यद्यपि सूत्रकारेण भाष्यकारेण वा न क्वापि प्रस्थानशब्देन व्यवहृतम् अथापि वेदान्तशास्त्रनिबन्धकारैः तच्छब्देन व्यवहृतम्। तत्र श्रुतिप्रस्थानम् "उपनिषद्" इति नाम्ना, स्मृतिप्रस्थानम् "भगवद्गीता" इति नाम्ना, न्यायप्रस्थानञ्च "ब्रह्मसूत्रम्" इति नाम्ना प्रसिद्धमस्ति।

वस्तुतः वेदेषु कर्मकाण्डम् उपासनाकाण्डं ज्ञानकाण्डञ्चेति काण्डत्रयम्। तत्र ज्ञानकाण्डं ज्ञानप्रतिपादकं चतुःसहस्रमन्त्रात्मकम्। प्रायः

[1] ब्रह्मसूत्रशाङ्करभाष्ये अध्यासभाष्यम्

[2] "गगनं गति ऋक्षाणां नदीनां सागरो गतिः। राजा गतिर्मनुष्याणां विप्राणां ब्राह्मणो गतिः॥" - सुभाषितम्

[3] "प्रस्थानं मार्गे" - वाच. पृ. ४५०१ "प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्" इति लोचने अभिनवगुप्तपादाः" ।

अद एव वेदान्तदर्शनमिति कथ्यते। तत्र वेदस्यान्तः सिद्धान्तः परमतात्पर्यं वा यस्मिन् स इति "अति बन्धने[1]" इत्यस्माद्धातोरन्तति बध्नाति व्यवस्थापयति वेदानां महातात्पर्यं यः स वेदान्तः। वेदान्तेऽस्मिन्मायाब्रह्म-जीवानां निरूपणम्। तथापि "**वेदान्तो नाम उपनिषत्प्रमाणम्**[2]" इति वेदान्ताचार्यैरुपनिषद्दर्शनमेव वेदान्तदर्शनमिति स्वीक्रियते। वेदान्तेऽप्यद्वैत-वादो विशिष्टाद्वैतवादः शुद्धाद्वैतवादो द्वैताद्वैतवादोऽचिन्त्याद्वैतवादो द्वैतवाद इति मतानि प्रस्तुतान्याचार्यैः। इदमेवोत्तरमीमांसाशब्देन व्यवह्रियते। "**तं त्वौपनिषदं पुरुषं पृच्छामि**[3]" इति श्रुत्यनुसारेण परमपुरुषस्य परमात्मन उपनिषदेकसमधिगम्यत्वमुक्तमिति प्रस्थानत्रये प्रथमं मुख्यं चेदमेव उपनिषत्प्रस्थानं श्रुतिप्रस्थानं वा। श्रुतिप्रस्थाने उपनिषदोऽन्तर्भवन्ति। "**केनेषितं पतति प्रेषितं मनः**[4]" इति जीवनसम्बद्धविचारे उपनिषदामैदम्पर्यं दृश्यते।

**"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।**
**तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति॥[5]"**

इत्यत्र तु यथाऽऽकाशवेष्टनमसम्भवं तथेश्वरज्ञानमन्तरेण संसारसन्तरणमसम्भवमित्यौपनिषदां निर्गलितः सिद्धान्तः। अत एव "**तमेव**

[1] धातुपाठः ६१
[2] वेदान्तसारः, पृ. १
[3] बृहदारण्यकोपनिषत्, ३.९.२६
[4] केनोपनिषत्, १.१
[5] श्वेताश्वतरोपनिषत्, ६.२०





**विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[1]" इति निर्णीतं नैगमवचसा।

विभिन्नदर्शनानां खण्डनस्य वैदिकधर्मस्य पुनः प्रतिष्ठापनाय करुणावरुणालयो भगवान् बादरायणः वेदव्यासः[2] पञ्चमवेदतुल्यं महाभारतं, महापुराणानि उपपुराणानि च निर्ममे। एतेषु महाभारतस्थश्रीमद्भगवद्गीता अन्यतमा वर्तते। श्रीभगवन्मुखारविन्दात् निःसृता अष्टादशभिरध्यायैः सप्तशतश्लोकैश्च पूर्णा, स्वभावमधुरपदविन्यासयुता, निःश्रेयसप्राप्त्युपायबोधिका, श्रुतीनामाशयपरिगृहीता, परश्शतैः प्राचीनैराचार्यैः प्रज्ञावद्भिश्च व्याख्याता, अध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिका भगवद्गीता अद्वैतवेदान्तसाहित्ये द्वितीयस्य स्मृतिप्रस्थानस्य स्थानमलभत।

ब्रह्मविषये अनाद्यपौरुषेयश्रुतिरेव प्रमाणम्। श्रुतिश्चातिसङ्क्षिप्तत्वादत्यन्तं दुरवबोधा। भाषा चातिपुरातनी। लोकाश्चोत्तरोत्तरं मन्दबुद्धयः। उपनिषत्सु जीवात्मनोऽविनाशित्वप्रतिपादनेन यज्ञादिकर्मकाण्डतदुपोद्बलकजन्यं स्वर्गादिपारलौकिकसुखमेव शाश्वतमिति लोकानां मतिरभवत्। एतादृशं लोकप्रत्ययं निराकरिष्णुः भगवान् बादरायणो ब्रह्मसूत्राणि प्रणिनाय। आचार्यशङ्करेण स्वकीयशारीरकभाष्ये युक्तितर्कसहकारेण वेदान्तसूत्राणामद्वैतव्याख्या प्रस्तुता। प्रायेण

[1] श्वेताश्वतरोपनिषत्, ६.१५; ३.८
[2] "विव्यास वेदान् यस्माच्च तस्माद् व्यास इति स्मृतः। द्वीपे न्यस्त स्वयं बालस्तस्माद्द्वैपायनोऽभवत्॥" – महाभारतम्, १.५७.७३

वेदान्तमतविरोधिनस्सर्वेऽपि वेदान्तमतखण्डनाय अद्वैतमेव खण्डयन्ति। इतरदार्शनिका बौद्धजैना अपि अद्वैतमेव खण्डयन्ति। तस्मात् बादरायणनिर्मितानि अद्वैतमूलभूतानि ब्रह्मसूत्राणि तृतीयं न्यायप्रस्थानमिति जेगीयन्ते।

### १.३ पूर्वतन्त्राद्वेदान्तशास्त्रस्य वैशिष्ट्यम्

(१) वेदो हि शास्त्रम् ।[1] वेदेषु कर्मकाण्डे परिदृश्यमानानाम् "उदिते जुहोति", "अनुदिते जुहोति" इत्यादि आपाततः परस्परविरुद्धार्थप्रतिपादकवेदवाक्यार्थानाम् अवधारणार्थं वेदवाक्यविचारात्मिकां पूर्वमीमांसां जैमिनिराचार्यः रचयामास । तथा च सर्वेषां वेदवचसां कर्मपरत्वं साक्षाद्विध्येकवाक्यतया प्रतिपादयामास । अपि च महर्षिजैमिनिना **"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते**[2]" इति सूत्रेण समस्तस्य वेदवाक्यस्य क्रियापरकत्वं विधाय क्रियारहितवाक्यानि सिद्धवस्तुबोधकानि वाक्यानि अप्रमाणभूतानि इति साधितम् । यथा सिद्धवस्तुस्वरूपस्य प्रतिपादनं वेदान्तवाक्यैः नैव सम्भवति । यतो हि तादृशसिद्धवस्तुनः परिज्ञानेन न किमपि प्रयोजनं सिध्यति । नूतनस्य सुखस्य प्राप्तिर्वा विद्यमानस्य दुःखस्य निवृत्तिर्वा सर्वैः प्रयोजनत्वेन इष्यते । एतदुभयं क्रियाजन्यत्वेन भवेत् । अत एव पूर्वतन्त्रे अर्थवादभागस्य सिद्धवस्तुबोधकस्य प्रयोजनवत्त्वाभावात् प्रयोजनवत्कर्मविधिशेषत्वं सिद्धान्तितम् । तस्मात् कर्मानुष्ठानेऽपेक्षितानां

[1] शिष्यते अनेन इति शास्त्रम् । शास्+"सर्वधातुभ्यः ष्ट्रन्" इति ष्ट्रन् ।
[2] जैमिनिसूत्रम्, १.२.१





कर्तृदेवताद्रव्यादीनां प्रकाशनद्वारा वेदान्तानामपि क्रियाविधिशेषत्वं स्वीकार्यम् । अन्यथा तेषामानर्थक्यं निष्प्रयोजनत्वं वा स्यात् ।

(२) वेदान्तानां वेदत्वात् शास्त्रत्वप्रसिद्धिरस्ति । प्रवृत्तिनिवृत्तिपरकपदसन्दर्भ एव शास्त्रमित्यभिधीयते । उक्तं हि भट्टपादेन –

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।**

**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥**[1] इति ।

अतः पूर्वतन्त्रे विधिनिषेधशास्त्रप्रसिद्धौ, स्वर्गकामाधिकरणकलञ्जभक्षणनिषेधाधिकरणादौ प्रवृत्तिनिवृत्त्यधिकारिचिन्ता कृता । अतः वेदान्तानाम् अहेयस्य अनुपादेयस्य च सिद्धस्य ब्रह्मणः बोधने निष्प्रयोजनत्वम् अस्ति । न ह्यसन्दिग्धे अर्थे न्यायः प्रवर्तते । यथा स्फीतालोकमध्यवर्तिभूतले घटो अस्ति न वेति इति । अत एव दध्यादिसिद्धवस्तुबोधकवेदभागस्य कर्मशेषतया सिद्धवस्तुबोधकत्वेनैव सार्थक्यमिति पूर्वतन्त्रे सिद्धान्तितम् । वेदान्तेषु श्रूयमाणानि जीवप्रतिपादकानि सर्वाणि वाक्यानि कर्माङ्गभूतकर्तृबोधनपराणि सन्ति । "अयमात्मा ब्रह्म"[2] इत्यादिब्रह्मप्रतिपादकानि वाक्यानि कर्मोपयोगिदेवताप्रकाशनपराणि सन्ति । यद्येवं स्वीक्रियेत तर्हि वेदान्तानाम् आनर्थक्यं न भविष्यति । किञ्च अनुष्ठानोपयोगिजीवब्रह्मोभयप्रतिपादकत्वेन तेषां सप्रयोजनत्वं सिध्यति ।

(३) वेदान्तवाक्यानां सिद्धब्रह्मबोधकत्वात्, सिद्धं च वस्तु प्रमाणान्तरेण ज्ञात्वा अन्यस्मै तद्बोधनाय लोके पुरुषाणां वाक्यरचनादर्शनात्

[1] श्लोकवार्तिकम्, पृ. ४०६
[2] बृहदारण्यकोपनिषत्, २.५.१९

सिद्धब्रह्मबोधकानां वेदान्तानां पौरुषेयत्वं प्रसज्येत प्रामाण्यं च सापेक्षं स्यात् । तस्मात् वेदान्तवाक्यानां क्रियापरत्वात् उपनिषदामपि तत्रैव अन्तर्भावात् पूर्वतन्त्रेण वेदान्तशास्त्रस्य गतार्थत्वं सिध्यति ।

यद्यपि "स्वाध्यायोऽध्येतव्यः[1]" इति स्वाध्यायविधिना स्वाध्यायस्य अर्थात् स्वकीयशाखारूपवेदस्य सप्रयोजनार्थप्रतिपादने तात्पर्यं निरूपितम् । अतः स्वशाखागतविधिनिषेधकर्मविषयकवाक्यावत् वेदान्तवाक्यानामपि फलवदर्थबोधकत्वं निश्चितम् । अयमेवार्थः महर्षिजैमिनिना "अविशिष्टस्तु वाक्यार्थः[2]" इत्यत्र न्यगादि । सूत्रस्यास्य विवरणकृता भाष्यकारेणापि उक्तम्- "अविशिष्टस्तु लोके प्रयुज्यमानानां वेदे च पदानामर्थः । स यथैव लोके विवक्षितः तथैव वेदे भवितुमर्हति[3]" इति ।

अतः संहिताभागवदेव वेदान्तवाक्यानां विवक्षितार्थत्वं स्वाभाविकमस्ति । वेदान्तवाक्यैः सच्चिदानन्दरूपकर्तृत्वभोक्तृत्वरहितं निष्प्रपञ्चं प्रत्यगात्मतत्त्वम् अवगम्यते तथापि कर्तृत्वभोक्तृत्वदुःखशोकादियुक्तात्मविषयकानि अहंप्रत्ययेन विरुध्यमानानि सन्देहबाधरहितानि वेदान्तवाक्यानि स्वार्थात् प्रच्युतानि जपमात्रोपयोगिनी अविवक्षितार्थानि भवन्ति । न हि सर्वजनप्रसिद्धाहमानुभवसिद्धः आत्मा सन्दिग्धो वा सप्रयोजनो वा । तस्मात् स जिज्ञास्यः शास्त्रार्थविचारप्रवर्तको वा नास्ति । फलतः पूर्वतन्त्रेण वेदान्तशास्त्रस्य गतार्थत्वमेवास्ति । अतः

[1] शतपथब्राह्मणम्, ११.५.७.२

[2] जैमिनीसूत्रम्, १.२.३२

[3] जैमिनीसूत्रभाष्यम्, १.२.३२





वेदान्तार्थविचारात्मकचतुर्लक्षणी शारीरकमीमांसा नारम्भणीया इति पूर्वपक्षः ।

अत्रोच्यते – शास्त्रे हि

**"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये"**

इति षड्विधानि तात्पर्यलिङ्गानि प्रतिपादितानि । यदि पूर्वपक्षेण प्रतिपादितोऽहमनुभवः प्रमाणभूतः स्यात् तर्हि पूर्वोक्तरीत्या वेदान्तशास्त्रस्य गतार्थतत्त्वं स्यात् । परमहमनुभवस्य प्रामाण्यं न हि श्रुतिवाक्यैः संवादितम्, न वा तीर्थकरैः अनुमोदितम् । पारिशेष्यात् अहमनुभवः अध्यासात्मकः एव अस्ति । एवं वेदान्ताः विरोधित्वाभावात् न अविवक्षितार्थाः, नाप्युपचरितार्थाः । परं ते तु नित्यशुद्धबुद्धमुक्तरूपात्मतत्त्वस्य प्रतिपादकाः सन्ति । प्रत्यगात्मैव तेषां मुख्योऽर्थः । वेदान्ता हि भिन्नप्रकरणस्थितत्त्वात् अद्वितीयसिद्धब्रह्मप्रतिपादकाः सन्ति । तेषाम् अद्वितीयब्रह्मबोधने एव तात्पर्यं निर्णीयते । उपनिषदाम् एतादृशलिङ्गानि अद्वितीयब्रह्मबोधने एव वर्तन्ते इति स्पष्टं ज्ञायते । यथा छान्दोग्ये षष्ठे अध्याये तत्त्वमसीति प्रकरणम् ।

(१) प्रायः सर्वाण्यपि शास्त्राणि अनुबन्धचतुष्टयनिरूपणपुरस्सरम् आरभ्यन्ते । "आत्मा वा अरे द्रष्टव्यः श्रोतव्[1]" इत्यादिश्रवणविधिषु उपलभ्यमानाधिकारिविषयसम्बन्धप्रयोजनानां स्वार्थे तात्पर्यनिर्णायकन्यायसूत्राभावे किं विवेकादिविशिष्टोऽधिकारी उतान्यः, वेदान्तानां विषयः कः, किं ब्रह्म प्रत्यगभिन्नं न वा, किं मुक्तिः

[1] बृहदारण्यकोपनिषत्, २.५.४

स्वर्गादिलोकान्तरप्राप्तिः उत आत्मस्वरूपा इत्यादिसंशयानिवृत्तेः वेदान्तविचारात्मके शास्त्रे अवश्यं जिज्ञासा भवति । सिद्धब्रह्मपराणां वेदान्तवाक्यानां पूर्वतन्त्रे अनिर्णीतत्वात् परम्परयापि कर्मपरत्वाभावात् तद्विचारात्मकं शास्त्रम् आरम्भणीयम् । अतो नैव पूर्वतन्त्रेण वेदान्तशास्त्रस्य गतार्थत्वं सम्भवति । तस्मात् वेदान्तानां ब्रह्मस्वरूपैकप्रतिपादनपरत्वम् अवश्यमभ्युपगन्तव्यम् । सर्वेषु वेदान्तेषु अद्वितीयब्रह्मबोधनपराणि असङ्ख्यानि वाक्यानि समानरीत्या दृश्यन्ते । यथा "सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्[1]", "आत्मा वा इदमेक एवाग्र आसीत्[2]", "अयमात्मा ब्रह्म सर्वानुभूः[3]", "ब्रह्मैवेदममृतं पुरस्तात्[4]" इत्यादीनि ब्रह्मस्वरूपमात्रं बोधयन्ति । एवं स्थिते सति वेदान्तानां श्रुतहानाश्रुतकल्पनाप्रसङ्गात् क्रियापरत्वकल्पना न युक्ता । न च वेदान्तवाक्यानां कर्तृदेवताप्रकाशनपरत्वं स्वीकर्तुं शक्यते । वेदान्तेष्वद्वितीयब्रह्मत्वबोधे सति क्रियाकारकफलभेदस्य निराकरणं श्रूयते- "तत्केन कं पश्येत्[5]" इत्यादि । अतः पूर्वमेव सिद्धस्य वस्तुनः प्रमाणान्तरेण ज्ञेयत्वं स्यादिति शङ्का न युक्ता । ब्रह्मात्मभावस्य उपनिषत्प्रमाणं विना केनापि प्रमाणान्तरेण ज्ञातुमशक्यत्वात् । "त्वं त्वौपनिषदं पुरुषं पृच्छामि[6]", "वेदान्तविज्ञानसुनिश्चितार्थाः[7]" इति श्रुतेः ।

[1] छान्दोग्योपनिषत्, ६.२.१
[2] ऐतरेयोपनिषत्, २.१.१
[3] बृहदारण्यकोपनिषत्, २.५.१९
[4] मुण्डकोपनिषत्, २.२.११
[5] बृहदारण्यकोपनिषत्, २.४.१३
[6] बृहदारण्यकोपनिषत्, ३.९.२६
[7] मुण्डकोपनिषत्, ३.२.६





वेदान्ताः साक्षात् ब्रह्म बोधयन्ति । तर्हि सिद्धे वस्तुनि प्रवृत्त्यादिलिङ्गाभावेन तस्य शक्तिग्रहः न भविष्यति इति न शङ्कनीयम् । प्रवृत्तिनिवृत्ती एव शक्तिग्रहे लिङ्गमिति न नियमः । क्वचित् "पुत्रस्ते जातः" इत्यादिषु स्थलेषु पटवासोपायनार्पणपूर्वकं वार्ताहरः कस्यचन पुरुषस्य निकटे "पुत्रस्ते जातः" इति वदति । तदा तन्निकटवर्ती बाल एतद्वाक्यश्रोतृपुरुषस्य मुखविकासादिना तदीयहर्षमनुमिमीते । हर्षेण च हर्षहेतुभूतं बोधं कल्पयति । हर्षकारणीभूते बोधे "पुत्रस्ते जातः" इति वाक्यस्य जनकत्वशक्तिं गृह्णाति । ततः प्रयोगविशेषेषु आवापोद्वापाभ्यां प्रतिपदम् अर्थशक्तिमवगच्छति । एवं च सिद्धे वस्तुनि अपि विना प्रवृत्तिनिवृत्ती शक्तिग्रहसम्भवात् सिद्धब्रह्मवस्तुबोधकत्वं वेदान्तानां न अनुपपन्नम् । न च वेदान्तानां सिद्धवस्तुबोधकत्वे नदीतीरफलसत्तावाक्यवत् पौरुषेयत्वं सापेक्षप्रामाण्यं च शङ्कनीयम् । ब्रह्मात्मैक्यस्य प्रमाणान्तरायोग्यत्वेन तत्र वाक्यरचनाऽसम्भवाद् न पौरुषेयत्वम्, न वा पौरुषेयत्वनिबन्धनं सापेक्षप्रामाण्यं वेदान्तानाम् ।

(२) यत्तूक्तं प्रवृत्त्यादिपरस्यैव शास्त्रत्वमिति[1], तदपि न । शास्त्रपदस्य अर्थद्वयं – "शासनम्", "शंसनम्" चेति । शासनं द्विविधम् – प्रवृत्तिः निवृत्तिर्वा । शासनार्थे शास्त्रं क्रियाप्रेरकमतः पुरुषतन्त्रम् । शंसनार्थे शास्त्रं ज्ञानपरमतः वस्तुतन्त्रम् । अतः हितशंसनाद् वेदान्तानां शास्त्रत्वम् उपपद्यते ।

[1] द्रष्टव्या १४ क्रमस्था पादटिप्पणी ।

(३) वेदान्तशास्त्रे तु एकमेव निवृत्त्यधिकारमार्गमाश्रित्य शास्त्रमिदं "अथातः" इत्यनेन सूत्रकृता प्रवर्तितम् । अतः निवृत्तिपरमेव शास्त्रमिदमिति सौत्रसिद्धान्तः । यथा यमनियमादिविधानैः वाङ्मनःकायव्यापारस्य निवृत्तिरेव कथ्यते, न पुनः प्रवृत्तिः । अतः यदि वेदान्तशास्त्रमिदं प्रवृत्तिपरं तर्हि कर्मणां श्रुतिविहितनिवृत्तिबोधनं बाधितं स्यात् । तस्मात् श्रवणादिशास्त्रं प्रत्यग्ब्रह्मात्मधीजननाय अनात्मश्रवणप्रवृत्त्यभावरूपमौदासीन्यविशमेव शास्तीति अर्थादेव आत्मश्रवणादिप्रवृत्तिः लभ्यते । अथ ब्रह्मात्मैक्यज्ञानेन मोक्ष इति वेदान्तसिद्धान्तः ।

***************